## विशाखयोश्च । (६२/३३८८)

छन्दसि इति वर्तते । [1]द्विवचने प्राप्ते[2] छन्दसि विषये विशाखयोरेकवचनमन्यतरस्यां भवति । 'विशाखं नक्षत्रमिन्द्राग्नी [3]देवता' (मै.सं. २.१३.२०) । [4]विशाखे नक्षत्रमिन्द्राग्नी देवता' (तै. सं. ४.४.१०.२) ॥

## तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम् । (६३/८२०)

छन्दसि इति निवृत्तम् । तिष्यः एकः, पुनर्वसू द्वौ, तेषां द्वन्द्वो बह्वर्थः । तत्र बहुवचने प्राप्ते द्विवचनं विधीयते । तिष्यपुनर्वस्वोः [5]नक्षत्रविषये द्वन्द्वे [6]बहुवचनप्रसङ्गे नित्यं द्विवचनं भवति । उदितौ तिष्यपुनर्वसू [7]दृश्येते । तिष्यपुनर्वस्वोः इति किम् ? [8]विशाखानुराधाः । नक्षत्रे इति किम् ? तिष्यश्च माणवकः, पुनर्वसू[9] माणवकौ, तिष्यपुनर्वसवो माणवकाः । [10]ननु च प्रकृतमेव नक्षत्रग्रहणं किमर्थं [11]पुनरुच्यते । पर्यायाणामपि यथा स्यात् । तिष्यपुनर्वसू । पुष्यपुनर्वसू । [12]सिद्धचपुनर्वसू । द्वन्द्वे इति किम्? यस्तिष्यस्तौ पुनर्वसू येषां त इमे 'तिष्यपुनर्वसवः'(वा.सं. २.६९)। उन्मु[13]ग्धाः तिष्यादय एव [14]विपर्ययेण दृश्यमाना बहुव्रीहिणोच्यन्ते । [15]तेन नक्षत्रसमास एवायम् । बहुवचनस्य इति किम् ? एकवचनस्य मा भूत् । तिष्यपुनर्वसु इदम् इति । 'सर्वो द्वन्द्वो [16]विभाषा एकवद् भवति' (व्या. प. ९१) इत्यस्यैतदेव ज्ञापकम् (म. भा. १.२३२) । नित्यग्रहणं विकल्पनिवृत्त्यर्थम् ॥

## सरूपाणामेकशेष एकविभक्तौ । (६४/१८८)

समानं रूपमे[17]षाम् [18]इति सरूपाः । सरूपाणां शब्दानां एकविभक्तौ परत एकशेषो भवति । एकः शिष्यते इतरे निवर्तन्ते । वृक्षश्च वृक्षश्च वृक्षौ । वृक्षश्च वृक्षश्च वृक्षश्च वृक्षाः । प्रत्यर्थं शब्दनिवेशान् नैकेनानेकस्याभिधानम् । [19]तत्रानेकार्थाभिधानेऽनेकशब्दत्वं [20]प्राप्तं तस्मादेकशेषः (म. भा. १.२३३)। सरूपाणाम् इति किम् ? [21]प्लक्षन्यग्रोधाः । रूपग्रहणं किम् ? भिन्नेऽप्यर्थे यथा स्यात् । अक्षाः । पादाः । माषाः[22] । एकग्रहणं किम् ? द्विबह्वोः [23]शेषो मा भूत् । शेषग्रहणं किम् ? आदेशो मा भूत् । एकविभक्तौ इति किम् ? पयः पयो जरयति[24] । ब्राह्मणाभ्यां च कृतं ब्राह्मणाभ्यां च देहि (म. भा. १.२३३) ॥

## वृद्धो यूना तल्लक्षणश्चेदेव विशेषः । (६५/९३१)

शेषः इति वर्तते । [25]यूना इति सहयोगे तृतीया । वृद्धो यूना सहवचने शिष्यते युवा निवर्तते । वृद्धशब्दः [26]पूर्वाचार्यसञ्ज्ञा गोत्रस्य 'अपत्यमन्तर्हितं वृद्धम्' इति । वृद्धयूनोः सहवचने वृद्धः शिष्यते [27]तल्लक्षणश्चेदेव [28]विशेषः । तद् इति [29]वृद्धयूनोर्निर्देशः । लक्षणशब्दो निमित्तपर्यायः । चेच्छब्दो [30]यद्यर्थे । एवकारोऽ[31]वधारणे । विशेषो वैरूप्यम् । वृद्धयुवनिमित्तकमेव यदि वैरूप्यं भवति ततो वृद्धः शिष्यते, [32]युवा निवर्तते । समानायामाकृतौ वृद्धयुवप्रत्ययौ भिद्येते ।

1. द्वयोः इत्यधिकम् ग. 2. एकवचनं विधीयते इत्यधिकम् अ. 3. देवते अ. 4. विशाखे नक्षत्रे इन्द्राग्नी देवते अ. 5. नक्षत्रयोः विषये फ. 6. बहुवचनस्य फ. ह. ड. 7. दृश्यते ग. 8. विशाखोनुराधाः ब, राधानुराधाः अ. ह. 9. च इत्यधिकम् अ. ड. 10. ननु नास्ति फ. 11. पुनरिदमुच्यते फ. ग. ह. 12. नास्ति फ. 13. उन्मुखाः ब. क. ड. ई., मुहेः कर्तरि क्तः अविविक्ताः इत्यर्थः ड, तिष्यादयः–मा भूत् नास्ति ह. 14. विपर्यासेन क. क.ड.अ. 20. प्राप्तं नास्ति फ. 21. वृक्षप्लक्षौ अ.क.ड, प्लक्षन्यग्रोधौ ग.ह. 22. इति इत्यधिकम् ड.क.अ. 23. शेषो नास्ति फ. 24. इति इत्यधिकम् क. 25. यूना–निवर्तते नास्ति ड. 26. पूर्वाचार्याणां सञ्ज्ञा अ. 27. युवा निवर्तते इत्यधिकम् 28. विशेषो भवति क. ड. अ. 29. वृद्धयुवनिर्देशः फ. 30. यद्यर्थः ड. 31. अवधारणार्थः ड. 32. युवा निवर्तते नास्ति अ. ड. फ. ह. क. ब.
15. तेन नास्ति फ. 16. विभाषया ड. 17. येषाम् क. अ. 18. ते ग. 19. अनेकस्यार्थस्याभिधाने अनेकशब्दत्वं